# Shri GAnapati Mangala Malika Stotram

# श्रीगणपतिमङ्गलमालिकास्तोत्रम्

## Document Information

Text title : gaNapatimangalamAlikAstotram

File name : gaNapatimangalamAlikAstotram.itx

Category : ganesha, mangala

Location : doc_ganesha

Transliterated by : Shree Devi Kumar

Proofread by : Shree Devi Kumar, PSA Easwaran

Latest update : August 25, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

Shri GAnapati Mangala Malika Stotram

# श्रीगणपतिमङ्गलमालिकास्तोत्रम्

श्रीकण्ठप्रेमपुत्राय गौरीवामाङ्गवासिने ।
द्वात्रिंशद्रूपयुक्ताय श्रीगणेशाय मङ्गलम् ॥ १॥

आदिपूज्याय देवाय दन्तमोदकधारिणे ।
वल्लभाप्राणकान्ताय श्रीगणेशाय मङ्गलम् ॥ २॥

लम्बोदराय शान्ताय चन्द्रगर्वापहारिणे ।
गजाननाय प्रभवे श्रीगणेशाय मङ्गलम् ॥ ३॥

पञ्चहस्ताय वन्द्याय पाशाङ्कुशधराय च ।
श्रीमते गजकर्णाय श्रीगणेशाय मङ्गलम् ॥ ४॥

द्वैमातुराय बालाय हेरम्बाय महात्मने ।
विकटायाखुवाहाय श्रीगणेशाय मङ्गलम् ॥ ५॥

पृष्णिशृङ्गायाजिताय क्षिप्राभीष्टार्थदायिने ।
सिद्धिबुद्धिप्रमोदाय श्रीगणेशाय मङ्गलम् ॥ ६॥

विलम्बियज्ञसूत्राय सर्वविघ्ननिवारिणे ।
दूर्वादलसुपूज्याय श्रीगणेशाय मङ्गलम् ॥ ७॥

महाकायाय भीमाय महासेनाग्रजन्मने ।
त्रिपुरारी वरो धात्रे श्रीगणेशाय मङ्गलम् ॥ ८॥

सिन्दूररम्यवर्णाय नागबद्धोदराय च ।
आमोदाय प्रमोदाय श्रीगणेशाय मङ्गलम् ॥ ९॥

विघ्नकर्त्रे दुर्मुखाय विघ्नहर्त्रे शिवात्मने । var कष्टकर्त्रे कष्टहर्त्रे
सुमुखायैकदन्ताय श्रीगणेशाय मङ्गलम् ॥ १०॥

समस्तगणनाथाय विष्णवे धूमकेतवे ।
त्र्यक्षाय भालचन्द्राय श्रीगणेशाय मङ्गलम् ॥ ११॥

चतुर्थीशाय मान्याय सर्वविद्याप्रदायिने ।
वक्रतुण्डाय कुब्जाय श्रीगणेशाय मङ्गलम् ॥ १२॥

तुण्डिने कपिलाक्षाय श्रेष्ठाय ऋणहारिणे ।
उद्दण्डोद्दण्डरूपाय श्रीगणेशाय मङ्गलम् ॥ १३॥

कष्टहर्त्रे द्विदेहाय भक्तेष्टजयदायिने ।
विनायकाय विभवे श्रीगणेशाय मङ्गलम् ॥ १४॥

सच्चिदानन्दरूपाय निर्गुणाय गुणात्मने ।
वटवे लोकगुरवे श्रीगणेशाय मङ्गलम् ॥ १५॥

श्रीचामुण्डासुपुत्राय प्रसन्नवदनाय च ।
श्रीराजराजसेव्याय श्रीगणेशाय मङ्गलम् ॥ १६॥

श्रीचामुण्डाकृपापात्र श्रीकृष्णेन्द्रविनिर्मिताम् ।
विभूतिमातृकारम्यां कल्याणैश्वर्यदायिनीम् ॥ १७॥

श्रीमहागणनाथस्य शुभां मङ्गलमालिकाम् ।
यः पठेत् सततं वाणीं लक्ष्मीं सिद्धिमवाप्नुयात् ॥ १८॥

इति श्रीकृष्णेन्द्ररचितं श्रीगणपतिमङ्गलमालिकास्तोत्रं सम्पूर्णम् ।

Encoded by Shree Devi Kumar

Proofread by Shree Devi Kumar, PSA Easwaran

*Shri GAnapati Mangala Malika Stotram*

pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*